MAULANA AZAD COLLEGE

SANSKRIT (HONOURS) B.A 5th SEMESTER

PAPER - CC11, SECTION – C, UNIT- I

1.**अधोलिखितयोः वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः ।** MARKS – 5*2

a. किं नु मलं किमाजिनं किमु श्मश्रूणि किं तपः। पुत्रं ब्रह्माण इच्छध्वं स वै लोकोऽवदावदः।अन्नं ह प्राणः शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः । सखा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्रः परमे व्योमन्, इति ।तज्जाया जाया भवति यदस्यां जायते पुनः। आभूतिरेषा भूतिर्बीजमेतन्निधीयते, इति ।

b. नापुत्रस्य लोकोऽस्तीति ततसर्वे पशवो विदुः। तस्मात् पुत्रो मातरं स्वसारं चाधिरोहति । एष पन्था उरुगायः सुशेवो यं पुत्रिण आक्रमन्ते विशोकाः । तं पश्यन्ति पशवो, वयांसि च तस्मात्ते मात्राऽपि मिथुनी भवन्ति, इति ।

c. तस्य ह त्रयः पुत्रा आसुः शुनःपुच्छः शुनःशेपः शुनोलाङ्गुल इति तं होवाच ऋषेऽहं ते शतं ददाम्यहमेषामेकेनात्मानं निष्क्रीणा इति स ज्येष्ठं पुत्रं निगृह्णान उवाच न न्विममिति नो एवेममिति कनिष्ठं माता तौ ह मध्यमे संपादयांचक्रतुः शुनःशेपे तस्य ह शतं दत्त्वा स तमादाय सोऽरण्याद् ग्राममेयाय, इति ।

d. स पितरमेत्योवाच तत हन्ताहमनेनात्मानं निष्क्रीणा इति स वरुणं राजानमुपससारानेन त्वा यजा इति तथेति भूयान् वै ब्राह्मणः क्षत्रियादिति वरुण उवाच तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच तमेतमभिषेचनीये पुरुषं पशुमालेभे ।

e. अथ ह शुनःशेप ईक्षांचक्रेऽमानुषमिव वै मा विशसिष्यन्ति हन्ताहं देवता उपधावामीति स प्रजापतिमेव प्रथमं देवतानामुपससार कस्य नूनं कतमस्यामृतानामित्येतयर्चा, इति ।तं प्रजापतिरुवाचाग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति सोऽग्निमुपससाराग्नेर्वयं प्रथमस्यामृतानामित्येतयर्चा, इति ।

f. तं विश्वे देवा ऊचुरिन्द्रो वै देवानामोजिष्ठो वलिष्ठः सहिष्ठः सत्तमः पारयिष्णुततमस्तं नु स्तुह्यथ त्वोतस्त्रक्ष्याम इति स इन्द्रं तुष्टाव यच्चिद्धि सत्य सोमपा इति चैतेन सूक्तेनोत्तरस्य च पञ्चदशभिः इति । तसमा इन्द्र स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ तमेतया प्रतीयाय शश्वदिन्द्र इति ।

g. अथ ह शुनःशेपो विश्वमित्रस्याङ्कमाससाद स होवाचजीगर्तः सौयवसिऋषे पुनर्मे पुत्रं देहीति नेति होवाच विश्वामित्रो देवा वा इमं मह्यमरासतेति स ह देवरातो वैश्वामित्र आस तस्यैते कापिलेयवाभ्रवाः, इति ।

h.स होवाचाजीगर्तः सौयवसिस्तद्वै मा तात तपति पापं कर्म मया कृतम् ।तदहं निहनुवे तुभ्यं प्रतियन्तु शता गवामिति स होवाच शुनःशेपो यः सकृतपापकं कुर्यातकुर्यादेनत्ततोहपरम् । नापागाः शौद्रान्न्यायादसंधेयं त्वया कृतमिति, इति ।

l. स होवाच शुनःशेपः स वै यथा नो ज्ञपयाहह राजपुत्र तथा वद । यथैवाहहङ्गिरसः सन्नुपेयां तव पुत्रतामिति स होवाच विश्वामित्रो ज्येष्ठो मे त्वं पुत्राणां स्यास्तव श्रेष्ठा प्रजा स्यात् । उपेया दैवं मे दायं तेन वै त्वोपमन्त्रय इति ।

j. स होवाच शुनःशेपः संज्ञानानेषु वै ब्रूयातसौहार्दाय मे श्रियै । यथाहहं भरतऋषभोपेयां तव पुत्रतामित्यथ ह विश्वामित्रः पुत्रानामन्त्रयामास मधुच्छन्दाः श्रृणोतन ऋषभो रेणुरष्ठकः । ये के च भ्रातरः स्थ नास्मै ज्यैष्ठ्याय कल्पध्वमिति ।

k. तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशतकनीयांसः, इति । स होवाच मधुच्छन्दाः पञ्चाशता सार्धं यन्नः पिता संजानीते तस्मिंस्तिष्ठामहे वयम् । पुरस्त्वा सर्वे कुर्महे त्वामन्वञ्चो वयं स्मसीति, इति ।

**अथवा**

2. **अधोलिखितेषु यथाभिलाषम् एकतरस्य सप्रसङ्गं व्याख्या कार्या ।** 10*1

a. ऋणमस्मिन् संनयत्यमृतत्वं च गच्छति / पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ।।

b. यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि / यावन्तो अप्सु प्राणिनां भूयान् पुत्रे पितुस्ततः।।

c. शश्वत पुत्रेण पितरोऽत्यायन् वहुलं तमः / आत्मा हि जज्ञे आत्मनः स इरावत्यतितारिणी ।।

d. पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम् / तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ।।

e. आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः/ शेते निपद्यमानस्य चराति चरतो भगश्चरैवेति ।।

f. कलिः शयानो भवति संजिहानस्तु द्वापरः/ उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरंश्चरैवेति ।।

g. चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम् / सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति ।।

h. पुष्पिण्यौ चरतो जङ्घे भूष्णुरात्मा फलग्राहिः / शेरेऽस्य सर्वे पाप्मानः श्रमेण प्रपथे हताश्चरैवेति ।।

**अथवा**

3.(a) मनुमत्स्यकथा कस्मिन् ब्राह्मने समुपलभ्यते? ग्रन्थोक्तदिशा मनुमत्स्यकथा उपाख्यानं उपस्थापयतु । 2+8

b. मनुमत्स्यकथा कस्मिन् वेदे समुपलभ्यते? पाठ्यांशमवलम्व्य आख्यानमिदं उपस्थातव्यम् । 2+8

c. स ह्यस्मै व्याचमुवाद । विभृहि मा पारयिष्यामि त्वेति कस्मान्मा पारयिष्य----- पारयितास्मीति कथं ते भृतिरिति।। - पाठ्यांशे यथा वर्णितं तथालोच्यताम् । 10